# A-II/1/1395/21

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वसङ्ग्रहे कति परिच्छेदाः सन्ति ?
2. आचार्यशान्तरक्षितस्य कः प्रधानशिष्य आसीत् ?
3. तत्त्वसंग्रहकारः भोटदेशे कस्य महाविहारस्य संस्थापको आसीत् ?

**अथवा**

तत्त्वसंग्रहकारस्य अन्ये ग्रन्थाः स्युः तर्हि तेषां नामानि लिखत।

4. तत्त्वसंग्रहस्य मंगलपद्यं लिखत।

**अथवा**

शब्दार्थपरीक्षायाः प्रथमकारिकां लिखत।

5. 'धी-ध्वनि' इति शब्दस्य कोऽर्थः ?
6. तत्त्वसंग्रहे शब्दस्य अर्थेन सह सम्बन्धः नित्यः अनित्यो वा ?
7. तत्त्वसंग्रहपञ्जिका केन लिखतम् ?

**अथवा**

अपोहः कः ? पाठ्यग्रन्थदिशा सूचयत।

8. मीमांसकाः शब्दार्थसम्बन्धस्य नित्यत्वं स्वीकुर्वन्ति अनित्यत्वं वा ?
9. 'विधिरेव शब्दार्थः' इति पूर्वपक्षः सिद्धान्तपक्षो वा ?
10. स्वलक्षणं कस्य विषयोऽस्ति ? सूचयत।
11. बौद्धानां मते सामान्यं जातिर्वा स्वीकार्या अस्वीकार्या वा ? सूचयत।
12. 'तत्र स्वलक्षणं तावन्नशब्दैः प्रतिपाद्यते' इत्यस्य को आशयः ?

**अथवा**

तत्त्वसंग्रहे विज्ञानस्य समर्थनं जायते निषेधो वा ?

13. व्यक्त्याकृतिजातीनां शब्दार्थत्वं नैयायिकानां पक्षोऽयं बौद्धाः स्वीक्रियन्ते न वा? पाठ्यग्रन्थदिशा उत्तरत।

14. शब्दार्थपरीक्षायां पूर्वपक्षरूपेण कति दार्शनिकमतानि सन्ति?

**अथवा**

शब्दार्थपरीक्षां पूर्वपक्षरूपेण केषां दार्शनिकमतानां संग्रहः वर्तते? नामानि लिखत।

15. अपोहः कतिविधः? नामानि लिखत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. तत्त्वसंग्रहग्रन्थस्य मङ्गलपद्यं विलिख्य व्याख्या कार्या।

17. कारिकायाः व्याख्या करणीया –

यस्य यस्य हि शब्दस्य यो यो विषय उच्यते। स स सङ्घटते नैव वस्तूनां सा हि धर्मता॥

**अथवा**

अतत्कारणभेदेन क्वचिच्छब्दो निवेश्यते। प्रयत्नोत्थो यथा शब्दो भ्रामरं वा यथा मधु॥

18. सप्रसंगं व्याख्या कुरुत –

हिमाचलादयो येऽपि देशकालाद्यभेदिनः। इष्टास्तेत्वणुशो भिन्ना क्षणिकाश्च प्रसाधिता॥

**अथवा**

प्रसज्यप्रतिषेधश्च गौरगौर्न भवत्ययम्। अतिविस्पष्ट एवायमन्यापोहोऽवगम्यते॥

19. सप्रसङ्गं व्याख्या कार्या –

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्। अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु॥

**अथवा**

अन्यापोहापरिज्ञानादेवमेते कुदृष्टयः। स्वयं नष्टा दुरात्मनो नाशयन्ति परानपि॥

20. व्याख्या कुरुत –

असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम्। शब्दो वाऽप्यभिजल्पत्वमागतो याति वाच्यताम्॥

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. पाठ्यांशस्य सारं ससन्दर्भं निबन्धात्मकं लिखत।

**अथवा**

आचार्यशान्तरक्षितस्य व्यक्तित्वं कृतीत्वं चाभिलक्ष्य प्रबन्धमेकं सम्यग्रीत्या लिखत।

**अथवा**

बौद्धन्याये शान्तरक्षितस्य अवदानम् अधिकृत्य निबन्धमेकं लिखत।

# A-II/2/1396/21

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रमाणवार्तिककारस्य अपरे ग्रन्थाः के? नामानि लिखत।

2. प्रमाणवार्तिके कति परिच्छेदाः? नामानि लिखत।

**अथवा**

'प्रमाणवार्तिकम्' कस्य ग्रन्थस्य वार्तिकम्? लिखत।

3. बौद्धमते कति प्रमाणानि? नामानि लिखत।

4. प्रत्यक्षप्रमाणस्य विषयः कः?

5. प्रमाणवार्तिकमते ईश्वरसिद्धिः जायते असिद्धिः वा?

**अथवा**

सामान्यस्य लक्षणं किम्?

6. अविसंवादनं किम्? ग्रन्थदिशा लिखत।

7. ग्रन्थस्य मङ्गलपद्यं लिखत।

8. का नाम कल्पना? बौद्धदिशा सूचयत।

**अथवा**

'प्रमाणवार्तिकस्य टीकाकारस्य भाष्यकारस्य वा कमप्येकस्य नामोल्लेखं कुरुत।

9. शाब्दं ज्ञानं प्रमाणम् अप्रमाणं वा? वार्तिकदिशा लिखत।

10. सांवृतं किम्?

**अथवा**

'धीप्रमाणता' इत्यस्य पदस्य कोऽर्थः? ग्रन्थदिशा लिखत।

11. प्रमाणवार्तिके विज्ञानस्य सिद्धिः जायतेः असिद्धिः वा?

12. ईश्वरः जगतः कारणं मन्यन्ते न वा? वार्तिकदिशा सूचयत।

13. प्रमाणं किम्? वार्तिकदिशा सूचयत।

**अथवा**

शास्त्रप्रणयनस्य किं फलम्? वार्तिकदिशा सूचयत।

14. आचार्यधर्मकीर्तिः युक्त्यनुयायी-विज्ञानवादी आगमानुयायी वा?

15. हेयोपादेयवेदकत्वात् कस्य सिद्धिः जायते? ईश्वरस्य बुद्धस्य वा?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वरस्मृतया प्रमाणवार्तिकस्य कारिकामेकां विलिख्य तस्याः स्वसंस्कृतगिरा व्याख्या कार्या, याऽत्र नागता स्यात्।

17. सप्रसङ्गं व्याख्येयम् –

प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः। अविसंवादनं शाब्देऽप्यभिप्रायनिवेदनात्॥

**अथवा**

सप्रसङ्गं व्याख्येयम् –

त्रिहेतोनोद्भवः कर्मदेहयोः स्थितयोरपि। एकाभावाद् विना बीजं नाङ्कुरस्येव सम्भवः॥

18. व्याख्या कार्या –

गृहीतग्रहणान्नेष्टं सांवृतं धीप्रमाणता। प्रवृत्तेस्तत्प्रधानत्वाद् हेयसोपादेयवस्तुनि॥

**अथवा**

सप्रसङ्ग व्याख्या कुरुत –

नित्यस्य निरपेक्षत्वात् क्रमोत्पत्तिर्विरुध्यते। क्रियायामक्रियायाश्च क्रिया च सदृशात्मनः॥

19. व्याख्या कार्या –

तद्वत् प्रमाणं भगवान् अभूतविनिवृत्तये। भूतोक्तिः साधनापेक्षा ततो युक्ता प्रमाणता॥

**अथवा**

व्याख्या विधेया –

आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रह द्वेषौ। अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते॥

20. सप्रसङ्गं व्याख्येयम् –

नित्यादुत्पत्तिविश्लेषादपेक्षया अयोगता। कथं-चिन्नोपकार्यत्वादनित्येऽप्यप्रमाणता॥

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. बौद्धनये प्रमाणस्य स्वरूपम् अधिकृत्य निबन्धमेकम् उपनिबद्धीकुरुत।

**अथवा**

बौद्धन्याये धर्मकीर्तेः योगदानम् अभिलक्ष्य निबन्धमेकं लिखत।

**अथवा**

प्रमाणवार्तिकग्रन्थस्य महत्वं सम्यक्तया प्रतिपादयत।

# A-II/3/1397/21

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. आचार्यनागार्जुनः कस्य दर्शनसम्प्रदायस्य प्रवर्तकः?
2. माध्यमिकदर्शनं कस्य बुद्धयानस्य दर्शनसम्प्रदायः?

**अथवा**

द्वितीयधर्मचक्रप्रवर्तनं कुत्र जातम्?

3. अहेतुतो कस्मात् भावाः न उत्पद्यन्ते?

**अथवा**

कस्य निरोधात् अविद्या निरोधा?

4. नागार्जुनः कस्य महाविहारस्य आचार्य आसीत्?
5. तृष्णा-निरोधे कः हेतुः? प्रतीत्यसमुत्पाददिशा सूचयत।

**अथवा**

सत्यद्वयं किम्? लिखत।

6. माध्यमिककारिकायाः प्रथमप्रकरणस्य नाम किम्? तत्र कति कारिकाः?
7. आत्मपरीक्षायाम् आत्मनः सत्ता स्वीक्रियते न वा?
8. माध्यमिककारिकायाः प्रसन्नपदाटीकायाः टीकाकारः कः?
9. यदि स्कन्धेभ्योऽन्य आत्मा भवेत् तदा कः दोषः? माध्यमिकदिशा विवेचयत।
10. माध्यमिकसम्प्रदायः कतिविधः? नामानि लिखत।

**अथवा**

विज्ञाननिरोधात् कस्य निरोधो भवति?

11. नैरात्म्यद्वयं किम्? लिखत।
12. प्रसन्नपदावृत्तिकारः कस्य माध्यमिकसम्प्रदायस्य अनुयायी? लिखत।

**अथवा**

माध्यमिकाचार्याणां त्रयाणां नामानि लिखत।

13. मध्यमकशास्त्रस्य मङ्गलपद्यं लिखत।
14. मध्यमकशास्त्रस्याभिधेयार्थः कः? पाठ्यग्रन्थदिशा लिखत।
15. प्रतीत्यसमुत्पादस्य कति विशेषणाः मध्यमकशास्त्रे निर्दिष्टाः? लिखत।

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थस्य स्वस्मृत्या एकां कारिकां विलिख्य व्याख्या कार्या। सा कारिका प्रश्नपत्रेऽस्मिन् नागता स्यात्।
17. व्याख्या विधेया –

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः। उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन॥

**अथवा**

भावानां निःस्वभावानां न सत्ता विद्यते यतः। सतीदमस्मिन् भवतीत्येतन्नैवोपपद्यते॥

–व्याख्या कार्या।

18. व्याख्या कुरुत –

गतं न गम्यते तावदगतं नैव गम्यते। गतागतविनिर्मुक्तं गम्यमानं न गम्यते॥

**अथवा**

गमनं सदसद्भूतस्त्रिप्रकारं न गच्छति। तस्माद्गतिश्च गन्ता च गन्तव्यं च न विद्यते॥

19. सप्रसङ्ग व्याख्यातव्या –

आत्मा स्कन्धा यदि भवेदुदयव्ययभाग्य भवेत्। स्कन्धेभ्योऽन्यो यदि भवेद्भवेदस्कन्धलक्षणः॥

**अथवा**

आत्मेत्यपि प्रज्ञप्तिमनात्मेत्यपि देशितम्। बुद्धैर्नात्मा न चानात्मा कश्चिदित्यपि देशितम्॥

–सप्रसङ्गं व्याख्या कुरुत।

20. व्याख्या करणीया –

क्रिया न प्रत्ययवती ना प्रत्ययवती क्रिया। प्रत्या नाक्रियावन्तः क्रियावन्तश्च सन्त्युतः॥

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. शून्यवादस्य वैशिष्ट्यम् अधिकृत्य निबन्धमेकं लिखत।

**अथवा**

आचार्यनागार्जुनस्य व्यक्तित्वं कृतित्वम् अभिलक्ष्य निबन्धमेकं विशदीकुरुत।

**अथवा**

पाठ्यग्रन्थस्य प्रत्ययपरीक्षायाः सारं लिखत।

# A-II/4/1398/21

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बोधिचर्यावतारस्य ग्रन्थकर्तुः अपरे ग्रन्थाः के? नामानि लिखत।
2. प्रज्ञा कतिविधा? नामानि लिखत।
3. बोधिचर्यावतारे 'बोधि' पदस्य कोऽभिप्रायः?
4. केन महाविहारेण सम्बद्धः आसीत् आचार्यमुसुकपादः?
5. सत्यं कतिविधम्? पाठ्यग्रन्थदिशा लिखत।
6. रत्नत्रयं किम्? नामानि लिखत।
7. कस्य बौद्धसम्प्रदायस्य ग्रन्थः बोधिचर्यावतारः?
8. पारमिताः कति नामानि लिखत।
9. 'न दोषो योगिसंवृत्या' कथम्?

   **अथवा**

   सुबाहुः कः?
10. बोधिसत्त्वानां कानि भूमयः?

    **अथवा**

    'शुभं दुर्बलमेव नित्यम्' इत्यस्याशयं लिखत।
11. बोधिचर्यावतारस्य मङ्गलपद्यं लिखत।

    **अथवा**

    महायानस्य उद्देश्यं किम्?
12. बोधिचित्तं कतिविधम्? नामानि लिखत।
13. प्राकृतको लोकः केन बाध्यते? पाठ्यग्रन्थानुसारं सूचयत।

    **अथवा**

    प्रज्ञोत्पादनस्य उद्देश्यं किम्?
14. बोधिचर्यावतारस्य पञ्जिकाकारः कः?

15. 'इमं परिकरं सर्वम्' इत्यत्र 'परिकर' शब्दस्य तात्पर्यं किम्?

**अथवा**

बहुसौख्यशतानि भोक्तुकामैः किं न विमोच्यम्?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थात् स्वस्मृत्या कारिकामेकां (या प्रश्नपत्रेऽस्मिन् नागता स्यात्) विलिख्य तस्याः विवृतिं कुरुत।

17. सप्रसङ्गं व्याख्यायताम् –

रात्रौ यथा मेघघनान्धकारे, विद्युत् क्षणं दर्शयति प्रकाशम्।
बुद्धानुभावेन तथा कदाचिल्लोकस्य पुण्येषु मतिः क्षणं स्यात्॥

**अथवा**

अथ यस्य मनः प्रसादमेति प्रसवेत्तस्य ततोऽधिकं फलम्।
महता हि बलेन पापकं जिनपुत्रेषु शुभं त्वयत्नतः॥

18. सम्यग्तया विवेचयत –

भवदुःखशतानि तर्तुकामैरपि सत्त्वव्यसनानि हर्तुकामैः।
बहुसौख्यशतानि भोक्तुकामैर्न विमोच्यं हि सदैव बोधिचित्तम्॥

**अथवा**

कृते यः प्रतिकुर्वीत सोऽपि तावत् प्रशस्यते।
अव्यापारितसाधुस्तु बोधिसत्त्वः किमुच्यताम्॥

19. सप्रसङ्गं व्याख्येयम् –

तद्बोधिचित्तं द्विविधं विज्ञातव्यं समासतः।
बोधिप्रणिधिचित्तं च बोधिप्रस्थानमेव च॥

20. सुगतान् ससुतान् सधर्मकायान्. . . . . .इति बोधिचर्यावतारस्य मङ्गलपद्यं विलिख्य सम्यग् व्याख्या विधेया।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. बोधिचर्यावतारस्य प्रथमपरिच्छेदस्य सारमवलम्ब्य निबन्धमेकं सविस्तरं लिखत।

**अथवा**

बोधिचर्यावतारग्रन्थस्य परिचयपूर्वकं माध्यमिकदर्शनेतस्यावदानं सम्यक्तया प्रतिपाद्यताम्।

**अथवा**

अधीतग्रन्थदिशा बोधिचित्तानुशंसा प्रतिपादनीया।

# A-II/5/1399/21

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. तत्त्वसङ्ग्रहस्य रचनाकार: क:?
2. शून्यवादस्य प्रवर्तक: क:?
3. असंग: कस्य दर्शनसम्प्रदायस्याचार्य:?
4. कति उपादानस्कन्धा:? नामानि लिखत।
5. नामरूपप्रत्ययं किम्?

**अथवा**

जातिनिरोधात् क: निरुध्यते?

6. न्यायबिन्दुग्रन्थस्य रचनाकार: क:?
7. बोधिचर्यावतारस्य मङ्गलाचरणं लिखत।
8. आचार्यकमलशील: कस्य शिष्य:?

**अथवा**

प्रमाणसमुच्चयस्य कर्त्ता क:?

9. बैभाषिका: बाह्यार्थवादिन: भवन्ति न वा?
10. बौद्धन्यायशास्त्रे कति प्रमाणानि स्वीकृतानि? लिखत।

**अथवा**

बौद्धप्रमाणशास्त्रस्य प्रथम: ग्रन्थ: क:?

11. युक्त्यानुयायिनां विज्ञानवादिनां ग्रन्थस्य नामोल्लेखं कुरुत।

**अथवा**

संस्कृतभाषायां कस्य सम्प्रदायस्य त्रिपिटकमस्ति?

12. द्वितीयसङ्गीतिः कदा कुत्र सञ्जाता ?

13. कथावत्थु केन पिटकेन सम्बद्धः ?

14. विज्ञानवादस्य सम्प्रदायद्वयस्य ग्रन्थद्वयस्य नामोल्लेखं कुरुत।

**अथवा**

पालिव्याकरणस्य ग्रन्थद्वयस्य नामोल्लेखं कुरुत।

15. बुद्धस्य जन्म-बुद्धत्व-महापरिनिर्वाणस्य एकैव मासः तिथिश्च उच्यते। तस्य नामोल्लेखं कुरुत।

**ब. सर्वे प्रश्नाः समाधेयाः। (5×6=30)**

16. शून्यवादस्य परिचयो देयः।

**अथवा**

योगाचारस्य वैशिष्ट्यं प्रतिपादयत।

17. प्रथमधर्म संगीत्यां किं जातमासीत् ? लिखत।

**अथवा**

अष्टादशधातवः के ? प्रतिपादयत।

18. सुत्तपिटके खुद्दकनिकायस्य ग्रन्थानां वर्णनं कुरुत।

**अथवा**

प्रतीत्यसमुत्पादस्य अंगानि कति ? वर्णनं कुरुत।

19. बोधिचित्तस्य वैशिष्ट्यं प्रतिपादयत।

20. बौद्धन्याये प्रमाणस्य किं स्वरूपम् ? प्रतिपादयत।

**स. एकः प्रश्नः समाधेयः। (1×20=20)**

21. वैभाषिकदर्शनस्य वैशिष्ट्यं प्रतिपादयत।

**अथवा**

भेरवादिनां साहित्यस्य परिचयो देयः।

**अथवा**

आर्यसत्यानि कानि ? सम्यग्तया विवेचयत।